**24E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

## संस्कृत पारंगत (एम.ए.) बहि:स्थ

## परीक्षा: मे – २०२५

## सत्र १ ले

### विषय: भाषाकौशल (24E3101)

**दिनांक: १३/०५/२०२५** **गुण : १००** **वेळ : दु. २.०० ते ५.००**

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १. विषयेकमधिकृत्य निबन्धो लेख्य:।** (२०)

आतङ्कवादः समस्या समाधनं च। मम महाविद्यालयः। पर्यावरण-संरक्षणम्।

**प्र. २ द्वयो: माध्यमभाषया अनुवादं कुरुत।** (१०)

१. एकस्मिन् नगरे चत्वारः ब्राह्मणपुत्राः परस्परं मित्रभावेन वसन्ति स्म । तेषां त्रयः शास्त्रपारङ्गताः, परन्तु अचतुराः। एकस्तु बुद्धिमान् परं शास्त्रपराङ्मुखः आसीत्। तस्य नाम सुबुद्धिः आसीत्। विद्याध्ययने तस्य रुचिः न आसीत् । अथ कदाचित् तैः मन्त्रितम्-'को गुणो विद्यायाः, यदि देशान्तरं गत्वा धनोपार्जनं न क्रियते ।' ततः ते पूर्वदेशं प्रति प्राचलन् । तथाऽनुष्ठिते ते मार्गे अटव्यां कानिचित् अस्थीनि अपश्यन् । ततः एकेन उक्तम्, अहो, अद्य विद्यायाः प्रयोगं कुर्मः। किञ्चिदेतत्सत्वं मृतमस्ति। तद् विद्याप्रभावेण जीवितं कुर्मः । अहमस्थिसञ्चयं करोमि ।' ततः तेन अस्थि-सञ्चयः कृतः । द्वितीयेन चर्ममांसरुधिरं संयोजितम् । तृतीयोऽपि यावज्जीवनं सञ्चारयति, तावत्सुबुद्धिना निषिद्धः, 'भो तिष्ठतु भवान् । एष सिंहो प्रतीयते। यद्येनं सजीवं करिष्यसि ततः सः सर्वानपि व्यापादयिष्यति ।'

२. गौरवः- अयं अस्माकम् विद्यालयः अस्ति । अत्र चतुस्सहस्रं छात्राः पठन्ति।
सौरभः- तव विद्यालये कति अध्यापकाः सन्ति ?
गौरवः- मम विद्यालये द्विशतम् अध्यापकाः अध्यापिकाः च पाठयन्ति ।
सौरभः- तव विद्यालयः अति सुन्दरः अस्ति। एषः विशालः अपि अस्ति ।
कणिका- पश्य, तत्र एकम् उद्यानम् अपि अस्ति ।
सौरभः- आम् ! सुन्दराणि पुष्पाणि अपि विकसन्ति । गौरव ! त्वम् विद्यालये किम् किम् करोषि ?
गौरवः- अहम् विद्यालये पठामि, लिखामि, धावामि, क्रीडामि नृत्यामि च । मम मित्राणि अपि अत्र पठन्ति । वयम् सर्वे प्रसन्नाः भवामः ।
कणिका- सौरभ ! अस्माकं विद्यालये वार्षिकोत्सवः अभवत् । तत्र एकस्मिन् नाटके गौरवः निजमित्रैः सह अभिनयमकरोत्। अहमपि नृत्यमकरवम्।

भारतस्य पश्चिम-दिशायां समुद्रतटे गोवानामकम् अतिरमणीयं पर्यटनस्थलमस्ति। पुरा अस्य नाम गोमन्तकक्षेत्रमासीत्। सह्याद्रिपर्वतशृङ्खलाभिः आवृत्तं गोवाराज्यस्य प्राकृतिकसौन्दर्यं पर्यटकान् आकर्षयति ।अत्र जनाः सङ्गीतप्रियाः नृत्यप्रियाः च सन्ति । अत्रत्यः कृषि-उत्सवः 'कार्निवल्' इति विश्वविख्यातः नृत्योत्सवः अस्ति । देश-विदेशेभ्यः पर्यटकाः अस्मिन् अवसरे अत्र आगच्छन्ति आनन्दं च विन्दन्ति ।अस्य प्रदेशस्य राजधानी 'पणजी'नाम्ना प्रसिद्धा अस्ति। अत्र माण्डोवी जुवारी च प्रमुखनद्यौ स्तः । एते नद्यौ आवर्षं प्रवहतः।

**प्र. ३ द्वयो: अन्वयं लिखित्वा माध्यमभाषया अनुवादं कुरुत।** (१६)

१. जातः सूर्यकुले पिता दशरथः क्षोणीभृतामग्रणीः सीता सत्यपरायणा प्रणयिनी यस्यानुजो लक्ष्मणः।
दोर्दण्डेन समो न चास्ति भुवने प्रत्यक्षविष्णुः स्वयं रामो येन विडम्बितोऽपि विधिना चान्ये जने का कथा।।

२. सौरभ्यं भुवनत्रयेऽपि विदितं शैत्यं नु लोकोत्तरं कीर्तिः किं च दिगङ्गनाङ्गणगता किं त्वेतदेकं शृणु ।
सर्वानिव गुणानियं निगिरति श्रीखण्ड ते सुन्दरानुज्झन्ती खलु कोटरेषु गरलज्वालां द्विजिह्वावली ।।

३. वासः काञ्चनपञ्जरे नृपकराम्भोजैर्तनूमार्जनं भक्ष्यं स्वादुरसालदाडिमफलं पेयं सुधाभं पयः ।
पाठ्यं संसदि रामनाम सततं धीरस्य कीरस्य मे हा हा हन्त तथापि जन्मविटपिक्रोडं मनो धावति ।।

**प्र.४. दश वाक्यानि संस्कृतभाषया अनुवदत।** (१०)

१. परमेश्वरच जगाचा कर्ता आहे.

२. तो तिला म्हणाला, 'या बागेत सुंदर फुले आहेत'.

३. तुला हा लेख आजच पूर्ण लिहायला हवा.

४. दोन विद्यार्थी शाळेत जाऊन बसले.

५. तू पुढील वर्षी स्नेहसंमेलनात नृत्य करशील का?

६. सगळे लोक जेव्हा येतील तेव्हा कार्यक्रम सुरु होईल.
७. मी माकडाला घाबरते.
८. मोठ्या बहिणीने त्याला गोडपदार्थ दिला.
९. परब्रह्माला नमस्कार.
१०. मी माझ्या मोठ्या भावाबरोबर गावाला गेले.
११. तू बातमी वाचलीस का?
१२. शिवाला बेल आवडतो.

**प्र. ५. चतुर्णां नामनिर्देशपूर्वकं समासविग्रहं कुरुत।** (४)

अ. चन्द्रसूर्यौ आ. दुग्धशर्करम् इ. चोरभयम् ई. चरणविकलः उ. मूषकवाहनः

**प्र. ६. पञ्चानां वाच्यपरिवर्तनं कुरुत।** (५)

१. तया हस्यते। २. राजीवः कथाम् अकथयत्। ३. महाराजः अश्वम् आरूढवान्।
४. भगिनीभिः काव्यं गीयते। ५. कार्येऽस्मिन् तौ साहाय्यमकुरुताम्। ६. जनैः सर्वैः सह स्नेहेन वक्तव्यम्।

**प्र. ७. दशानां रूपपरिचयं कुरुत।** (१०)

१. छेत्स्यति २. तपः ३. प्रष्टव्यम् ४. इमानि ५. गर्जितवान् ६. चिन्तितेन
७. लिख्यताम् ८. यूयम् ९. विहस्य १०. वाक्षु ११. हर्तुम् १२. जग्ध्वा

**प्र. ८. पञ्च सन्धीन् कुरुत विघटयत वा।** (५)

१. यद्यपि २. कवी राजते ३. त्वमपि
४. मेघवर्णः +नाम ५. शत्रोश्च ६. वाक्+हरिः

**प्र. ९. सूचनानुसारं कृतीः कुरुत।** (१५)

१. काचित् महिला गोदावरीतीरे निवसति। (लङ्लकारे परिवर्तयत।)
२. नेता आगत्य भाषणमकरोत्। ('च' इति अव्ययं योजयत।)
३. वयमवकरं ----- बहिःक्षिपामः। ('गृह' इति पदस्य योग्यं रूपं लिखत।)
४. भवान् कोलाहलं मा -----। (कृ धातोः योग्यरूपं लिखत।)
५. अर्चकः ईश्वरं पूजितवान्। (बहुवचने परिवर्तयत।)
६. मार्गे ----- महिलाः वर्तन्ते। (त्रि इति सङ्ख्यावाचकस्य योग्यं पदं लिखत।)
७. पुत्री ----- स्निह्यति। ('पितामही' इति पदस्य योग्यरूपं लिखत।)
८. त्वं यथेच्छसि तथा कुरु। (त्वं स्थाने भवान् योजयत।)
९. गुरुः शिष्यम् उपदिशति। (लिङ् लकारे परिवर्तयत।)
१०. विघ्नाः नश्यन्ति। (ईश्वरः इति कर्तृपदं योजयत।)
११. वयम् आनन्देन निवसामः। (लट् स्थाने लङ् लिखत।)
१२. ----- वस्त्राणि ददातु। ('रजक' इति पदस्य योग्यरूपं लिखत।)
१३. यदा विद्युत्प्रवाहः खण्डितः तदा कलहः सञ्जातः। (सतिसप्तमीरचनां लिखत।)
१४. अलं -----। ('विवाद' इति पदस्य योग्यरूपं लिखत।)
१५. रामः राजा ---। (भू धातोः लिट्लकारस्य रूपं लिखत।)
१६. तपस्विनः तपांसि कुर्वीरन्। (एकवचने परिवर्तयत।)
१७. क्रीडायां बालाः परस्परं स्पृशन्ति धावन्ति च। (पूर्वकालवाचकं योजयत।)

**प्र. १०. पञ्च रूपाणि लिखत।** (०५)

शी २ आ.प. हेत्वर्थक-अव्ययम् वृ ९ आ.प. लट्लकारः प्रथमपुरुषएकवचनम्
स्निह् ४ प.प.लिङ्लकारः प्रथमपुरुषएकवचनम् चिन्त् १०प.प. लृट् उत्तमपुरुषएकवचनम्
अस् लट् मध्यमपुरुषः द्विवचनम् अनु+ग्रह् पूर्वकालवाचक-अव्ययम्

------------